श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ अष्टाविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टाविंशः सर्गः ॥

## श्रीरामेण वर्षर्तोर्वर्णनम्

स तदा वालिनं हत्वा सुग्रीवमभिषिच्य च।
वसन् माल्यवतः पृष्ठे रामो लक्ष्मणमब्रवीत्॥ **4.28.1** ॥

अयं स कालः सम्प्राप्तः समयोऽद्य जलागमः।
सम्पश्य त्वं नभो मेघैः संवृतं गिरिसन्निभैः॥ **4.28.2** ॥

नवमासधृतं गर्भं भास्करस्य गभस्तिभिः।
पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम्॥ **4.28.3** ॥

शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः।
कुटजार्जुनमालाभिरलङ्कर्तुं दिवाकरः॥ **4.28.4** ॥

सन्ध्यारागोत्थितैस्ताम्रैरन्तेष्वपि च पाण्डुभिः।
स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवाम्बरम्॥ **4.28.5** ॥

मन्दमारुतिनिःश्वासं सन्ध्याचन्दनरञ्जितम्।
आपाण्डुजलदं भाति कामातुरमिवाम्बरम्॥ **4.28.6** ॥

एषा घर्मपरिक्लिष्टा नववारिपरिप्लुता।
सीतेव शोकसन्तप्ता मही बाष्पं विमुञ्चति॥ **4.28.7** ॥

मेघोदरविनिर्मुक्ताः कर्पूरदलशीतलाः।
शक्यमञ्जलिभिः पातुं वाताः केतकगन्धिनः॥ **4.28.8** ॥

एष फुल्लार्जुनः शैलः केतकैरभिवासितः।
सुग्रीव इव शान्तारिर्धाराभिरभिषिच्यते॥ **4.28.9** ॥

मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः।
मारुतापूरितगुहाः प्राधीता इव पर्वताः॥ **4.28.10** ॥

कशाभिरिव हैमीभिर्विद्युद्भिरभिताडितम्।
अन्तःस्तनितनिर्घोषं सवेदनमिवाम्बरम्॥ **4.28.11** ॥

नीलमेघाश्रिता विद्युत् स्फुरन्ती प्रतिभाति मे।
स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी॥ **4.28.12** ॥

इमास्ता मन्मथवतां हिताः प्रतिहता दिशः।
अनुलिप्ता इव घनैर्नष्टग्रहनिशाकराः॥ **4.28.13** ॥

क्वचिद् बाष्पाभिसंरुद्धान् वर्षागमसमुत्सुकान्।
कुटजान् पश्य सौमित्रे पुष्पितान् गिरिसानुषु।
मम शोकाभिभूतस्य कामसन्दीपनान् स्थितान्॥ **4.28.14** ॥

रजः प्रशान्तं सहिमोऽद्य वायु -
    र्निदाघदोषप्रसराः प्रशान्ताः।
स्थिता हि यात्रा वसुधाधिपानां
    प्रवासिनो यान्ति नराः स्वदेशान्॥ **4.28.15** ॥

सम्प्रस्थिता मानसवासलुब्धाः
    प्रियान्विताः सम्प्रति चक्रवाकाः।
अभीक्ष्णवर्षोदकविक्षतेषु
    यानानि मार्गेषु न सम्पतन्ति॥ **4.28.16** ॥

क्वचित् प्रकाशं क्वचिदप्रकाशं
　नभः प्रकीर्णाम्बुधरं विभाति।
क्वचित्क्वचित् पर्वतसन्निरुद्धं
　रूपं यथा शान्तमहार्णवस्य॥ **4.28.17** ॥

व्यामिश्रितं सर्जकदम्बपुष्पै -
　र्नवं जलं पर्वतधातुताम्रम्।
मयूरकेकाभिरनुप्रयातं
　शैलापगाः शीघ्रतरं वहन्ति॥ **4.28.18** ॥

रसाकुलं षट्पदसन्निकाशं
　प्रभुज्यते जम्बुफलं प्रकामम्।
अनेकवर्णं पवनावधूतं
　भूमौ पतत्याम्रफलं विपक्वम्॥ **4.28.19** ॥

विद्युत्पताकाः सबलाकमालाः
　शैलेन्द्रकूटाकृतिसन्निकाशाः।
गर्जन्ति मेघाः समुदीर्णनादा
　मत्ता गजेन्द्रा इव संयुगस्थाः॥ **4.28.20** ॥

वर्षोदकाप्यायितशाद्वलानि
　प्रवृत्तनृत्तोत्सवबर्हिणानि।
वनानि निर्वृष्टबलाहकानि
　पश्यापराह्णेष्वधिकं विभान्ति॥ **4.28.21** ॥

समुद्वहन्तः सलिलातिभारं
　बलाकिनो वारिधरा नदन्तः।
महत्सु शृङ्गेषु महीधराणां
　विश्रम्य विश्रम्य पुनः प्रयान्ति॥ **4.28.22** ॥

मेघाभिकामा परिसम्पतन्ती
    सम्मोदिता भाति बलाकपङ्क्तिः।
वातावधूता वरपौण्डरीकी
    लम्बेव माला रुचिराम्बरस्य ॥ **4.28.23** ॥

बालेन्द्रगोपान्तरचित्रितेन
    विभाति भूमिर्नवशाद्वलेन।
गात्रानुपृक्तेन शुकप्रभेण
    नारीव लाक्षोक्षितकम्बलेन ॥ **4.28.24** ॥

निद्रा शनैः केशवमभ्युपैति
    द्रुतं नदी सागरमभ्युपैति।
हृष्टा बलाका घनमभ्युपैति
    कान्ता सकामा प्रियमभ्युपैति ॥ **4.28.25** ॥

जाता वनान्ताः शिखिसुप्रनृत्ता
    जाताः कदम्बाः सकदम्बशाखाः।
जाता वृषा गोषु समानकामा
    जाता मही सस्यवनाभिरामा ॥ **4.28.26** ॥

वहन्ति वर्षन्ति नदन्ति भान्ति
    ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः
    प्रियाविहीनाः शिखिनः प्लवङ्गमाः ॥ **4.28.27** ॥

प्रहर्षिताः केतकिपुष्पगन्ध -
    माघ्राय मत्ता वननिर्झरेषु।
प्रपातशब्दाकुलिता गजेन्द्राः
    सार्धं मयूरैः समदा नदन्ति ॥ **4.28.28** ॥

धारानिपातैरभिहन्यमानाः
    कदम्बशाखासु विलम्बमानाः।
क्षणार्जितं पुष्परसावगाढं
    शनैर्मदं षड्चरणास्त्यजन्ति ॥ **4.28.29** ॥

अङ्गारचूर्णोत्करसन्निकाशैः
    फलैः सुपर्याप्तरसैः समृद्धैः।
जम्बूद्रुमाणां प्रविभान्ति शाखा
    निपीयमाना इव षट्पदौघैः ॥ **4.28.30** ॥

तडित्पताकाभिरलङ्कृताना -
    मुदीर्णगम्भीरमहारवाणाम्।
विभान्ति रूपाणि बलाहकानां
    रणोत्सुकानामिव वारणानाम् ॥ **4.28.31** ॥

मार्गानुगः शैलवनानुसारी
    सम्प्रस्थितो मेघरवं निशम्य।
युद्धाभिकामः प्रतिनादशङ्की
    मत्तो गजेन्द्रः प्रतिसन्निवृत्तः ॥ **4.28.32** ॥

क्वचित् प्रगीता इव षट्पदौघैः
    क्वचित् प्रनृत्ता इव नीलकण्ठैः।
क्वचित् प्रमत्ता इव वारणेन्द्रै -
    र्विभान्त्यनेकाश्रयिणो वनान्ताः ॥ **4.28.33** ॥

कदम्बसर्जार्जुनकन्दलाढ्या
    वनान्तभूमिर्मधुवारिपूर्णा।
मयूरमत्ताभिरुतप्रनृत्तै -
    रापानभूमिप्रतिमा विभाति ॥ **4.28.34** ॥

मुक्तासमाभं सलिलं पतद् वै
सुनिर्मलं पत्रपुटेषु लग्नम्।
हृष्टा विवर्णच्छदना विहङ्गाः
सुरेन्द्रदत्तं तृषिताः पिबन्ति॥ **4.28.35**॥

षट्पादतन्त्रीमधुराभिधानं
प्लवङ्गमोदीरितकण्ठतालम्।
आविष्कृतं मेघमृदङ्गनादै -
र्वनेषु सङ्गीतमिव प्रवृत्तम्॥ **4.28.36**॥

क्वचित् प्रनृत्तैः क्वचिदुन्नदद्भिः
क्वचिच्च वृक्षाग्रनिषण्णकायैः।
व्यालम्बबर्हाभरणैर्मयूरै -
र्वनेषु सङ्गीतमिव प्रवृत्तम्॥ **4.28.37**॥

स्वनैर्घनानां प्लवगाः प्रबुद्धा
विहाय निद्रां चिरसन्निरुद्धाम्।
अनेकरूपाकृतिवर्णनादा
नवाम्बुधाराभिहता नदन्ति॥ **4.28.38**॥

नद्यः समुद्वाहितचक्रवाका -
स्तटानि शीर्णान्यपवाहयित्वा।
दृप्ता नवप्रावृतपूर्णभोगा -
द्रुतं स्वभर्तारमुपोपयान्ति॥ **4.28.39**॥

नीलेषु नीला नववारिपूर्णा
मेघेषु मेघाः प्रतिभान्ति सक्ताः।
दवाग्निदग्धेषु दवाग्निदग्धाः
शैलेषु शैला इव बद्धमूलाः॥ **4.28.40**॥

प्रमत्तसन्नादितबर्हिणानि
सशक्रगोपाकुलशाद्वलानि।
चरन्ति नीपार्जुनवासितानि
गजाः सुरम्याणि वनान्तराणि॥ **4.28.41** ॥

नवाम्बुधाराहतकेसराणि
द्रुतं परित्यज्य सरोरुहाणि।
कदम्बपुष्पाणि सकेसराणि
नवानि हृष्टा भ्रमराः पिबन्ति॥ **4.28.42** ॥

मत्ता गजेन्द्रा मुदिता गवेन्द्रा
वनेषु विक्रान्ततरा मृगेन्द्राः।
रम्या नगेन्द्रा निभृता नरेन्द्राः
प्रक्रीडितो वारिधरैः सुरेन्द्रः॥ **4.28.43** ॥

मेघाः समुद्भूतसमुद्रनादा
महाजलौघैर्गगनावलम्बाः।
नदीस्तटाकानि सरांसि वापी -
र्महीं च कृत्स्नामपवाहयन्ति॥ **4.28.44** ॥

वर्षप्रवेगा विपुलाः पतन्ति
प्रवान्ति वाताः समुदीर्णवेगाः।
प्रणष्टकूलाः प्रवहन्ति शीघ्रं
नद्यो जलं विप्रतिपन्नमार्गाः॥ **4.28.45** ॥

नरैर्नरेन्द्रा इव पर्वतेन्द्राः
सुरेन्द्रदत्तैः पवनोपनीतैः।
घनाम्बुकुम्भैरभिषिच्यमाना
रूपं श्रियं स्वामिव दर्शयन्ति॥ **4.28.46** ॥

घनोपगूढं गगनं न तारा
न भास्करो दर्शनमभ्युपैति।
नवैर्जलौघैर्धरणी वितृप्ता
तमोविलिप्ता न दिशः प्रकाशाः ॥ **4.28.47** ॥

महान्ति कूटानि महीधराणां
धाराविधौतान्यधिकं विभान्ति।
महाप्रमाणैर्विपुलैः प्रपातै -
र्मुक्ताकलापैरिव लम्बमानैः ॥ **4.28.48** ॥

शैलोपलप्रस्खलमानवेगाः
शैलोत्तमानां विपुलाः प्रपाताः।
गुहासु सन्नादितबर्हिणासु
हारा विकीर्यन्त इवावभान्ति ॥ **4.28.49** ॥

शीघ्रप्रवेगा विपुलाः प्रपाता
निर्धौतशृङ्गोपतला गिरीणाम्।
मुक्ताकलापप्रतिमाः पतन्तो
महागुहोत्सङ्गतलैर्ध्रियन्ते ॥ **4.28.50** ॥

सुरतामर्दविच्छिन्नाः स्वर्गस्त्रीहारमौक्तिकाः।
पतन्ति चातुला दिक्षु तोयधाराः समन्ततः ॥ **4.28.51** ॥

विलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः।
विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः ॥ **4.28.52** ॥

वृत्ता यात्रा नरेन्द्राणां सेना पथ्येव वर्तते।
वैराणि चैव मार्गाश्च सलिलेन समीकृताः ॥ **4.28.53** ॥

मासि प्रौष्ठपदे ब्रह्म ब्राह्मणानां विवक्षताम्।
अयमध्यायसमयः सामगानामुपस्थितः॥ **4.28.54** ॥

विवृत्तकर्मायतनो नूनं सञ्चितसञ्चयः।
आषाढीमभ्युपगतो भरतः कोसलाधिपः॥ **4.28.55** ॥

नूनमापूर्यमाणायाः सरय्वा वर्धते रयः।
मां समीक्ष्य समायान्तमयोध्याया इव स्वनः॥ **4.28.56** ॥

इमाः स्फीतगुणा वर्षाः सुग्रीवः सुखमश्नुते।
विजितारिः सदारश्च राज्ये महति च स्थितः॥ **4.28.57** ॥

अहं तु हृतदारश्च राज्याच्च महतश्च्युतः।
नदीकूलमिव क्लिन्नमवसीदामि लक्ष्मण॥ **4.28.58** ॥

शोकश्च मम विस्तीर्णो वर्षाश्च भृशदुर्गमाः।
रावणश्च महाञ्छत्रुरपारः प्रतिभाति मे॥ **4.28.59** ॥

अयात्रां चैव दृष्ट्वेमां मार्गांश्च भृशदुर्गमान्।
प्रणते चैव सुग्रीवे न मया किञ्चिदीरितम्॥ **4.28.60** ॥

अपि चापि परिक्लिष्टं चिराद् दारैः समागतम्।
आत्मकार्यगरीयस्त्वाद् वक्तुं नेच्छामि वानरम्॥ **4.28.61** ॥

स्वयमेव हि विश्रम्य ज्ञात्वा कालमुपागतम्।
उपकारं च सुग्रीवो वेत्स्यते नात्र संशयः॥ **4.28.62** ॥

तस्मात् कालप्रतीक्षोऽहं स्थितोऽस्मि शुभलक्षण।
सुग्रीवस्य नदीनां च प्रसादमभिकाङ्क्षयन्॥ **4.28.63** ॥

उपकारेण वीरो हि प्रतीकारेण युज्यते।
अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः॥ **4.28.64** ॥

अथैवमुक्तः प्रणिधाय लक्ष्मणः
कृताञ्जलिस्तत् प्रतिपूज्य भाषितम्।
उवाच रामं स्वभिरामदर्शनं
प्रदर्शयन् दर्शनमात्मनः शुभम्॥ **4.28.65**॥

यदुक्तमेतत् तव सर्वमीप्सितं
नरेन्द्र कर्ता नचिराद्धरीश्वरः।
शरत्प्रतीक्षः क्षमतामिमं भवाञ्
जलप्रपातं रिपुनिग्रहे धृतः॥ **4.28.66**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टाविंशः सर्गः॥